# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – रामानुजवेदान्तः **कोड – CC-3.5.10** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – ३०/११/२०१६ सन्दर्भग्रन्थः – श्रीभाष्यम् (मङ्गलाचरणतः समन्वयाधिकरणपर्यन्तो भागः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधस्तनेषु द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं प्रदीयताम्।** ०८

(१) पूर्वोत्तरमीमांसाशास्त्रयोः एकशास्त्रत्वं यथाभाष्यं प्रतिपादयत

(२) ब्रह्मशब्दस्य यथाभाष्यं व्याख्यां लिखत।

(३) ज्ञानकर्मसमुच्चयनिराकरणं पूर्वपक्षरीत्या यथाभाष्यं प्रतिपादयत।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) भगवद्रामानुजस्य श्रीभाष्यस्य ब्रह्मसूत्रभाष्येषु वैशिष्ट्यं प्रतिपादयत

(२) ब्रह्मणः निर्विशेशत्वस्वरूपं निरस्य सविशेषरूपं यथाभाष्यं साधयत।

**प्रश्नः – ३ निम्नलिखितयोः कस्यचिद् एकस्य उपरि लघुटिप्पणीं लिख्यताम्** ०२

(१) सूत्रलक्षणम्। (२) भाष्यलक्षणम्।

**प्रश्नः – ४ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत।** ०२

(१) श्रीभाष्यं केन प्रणीतम्? (३) भाष्ये अथशब्दस्य कः अर्थः ?

(२) "ब्रह्मजिज्ञासा" इत्यत्र कः समासः ? (४) किं नाम संवित्?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधस्तनेषु द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं प्रदीयताम्** ०८

(१) मायाशब्दार्थः न अद्वैतिसंमतः इति भाष्योक्तदिशा साधयत।

(२) निर्विशेषवस्तुनः प्रमाणतः असिद्धिं प्रदर्शयत।

(३) "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुत्यर्थं स्पष्टयत।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत।** ०८

(१) यथाभाष्यं जिज्ञासाधिकरणस्य सारांशं लिखत

(२) ब्रह्मणः जगदुपादानत्वं यथाभाष्यं प्रकटयत।

**प्रश्नः – ७ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) अधिकरणलक्षणम्। (३) विशिष्टाद्वैतपदस्य अर्थः।

(२) "श्रीभाष्यम्" इति अभिधानम्। (४) भेदाभेदवादः।

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) किं नाम जिज्ञासा ? (५) सत्ख्यातिवादः कस्य मतम् ?

(२) किं नाम ज्ञातृत्वम्? (६) अनिर्वचनीयख्यातिवादः कस्य मतम्?

(३) मिथ्यावादिनः के? (७) वेदान्ताः किं ब्रह्म बोधयन्ति ?

(४) ब्रह्मसूत्रेषु कति अध्यायाः सन्ति?

## तृतीयान्विति: (Unit-3)

**प्रश्नः – ९ अधस्तनेषु द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं प्रदीयताम्** ०८

(१) "जन्माद्यस्य यतः" इति सूत्रार्थं यथाभाष्यं विवृणुत

(२) ईश्वरविषये कार्यत्वहेतुकानुमानं यथाभाष्यं लिखत।

(३) ब्रह्मणः शास्त्रैकगम्यत्वं यथाग्रन्थं प्रतिपादयत।

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) जीवब्रह्मणोः भेदाभेदप्रतिपादनं यथाभाष्यं लिखत।

(२) समन्वयाधिकरणस्य सारांशं निबन्धयत।

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) शास्त्रयोनित्वात् इति पदस्य विग्रहः।

(२) मिथ्यात्वम् इति पदस्य अर्थः।

(३) "एकमेवाद्वितीयं ब्रह्म"।

(४) "जन्माद्यस्य" इत्यत्र आदिपदेन कस्य ग्रहणम्?

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) शास्त्रयोनित्वाधिकरणे कति सूत्राणि सन्ति?

(२) विशिष्टाद्वैतमते जीवन्मुक्तिः स्वीक्रियते उत न?

(३) निर्विशेषं ब्रह्म कस्मिन् दर्शने स्वीक्रियते?

(४) इमानि भूतानि कुतः जायन्ते?

(५) ब्रह्मविषये किं प्रमाणम् अस्ति?

(६) श्रीभाष्यानुसारं ब्रह्मसूत्राणां सङ्ख्या कति वर्तते?

(७) "प्रवृत्तिनिवृत्तिपरकं शास्त्रम्" इति के स्वीकुर्वन्ति?

***

# Answer Key

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – रामानुजवेदान्तः | **कोड – CC-3.5.10** | समयः – ११ तः ०२ पर्यन्तम् |
| दिनाङ्कः – ३०/११/२०१६ | सन्दर्भग्रन्थः – श्रीभाष्यम् (मङ्गलाचरणतः समन्वयाधिकरणपर्यन्तो भागः) | |

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – ३**

१. अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् । अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥

२. सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्णयन्ते भाष्यं भाष्यविदो विदुः

**प्रश्नः – ४**

१. रामानुजाचार्येण

२. ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा, ब्रह्मणः इति कर्मणि षष्ठी

३. आनन्तर्ये

४. आत्मा

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ७**

१. विषयो विषयश्चैव विचारो निर्णयस्तथा । प्रयोजनं च पञ्चाङ्गं प्राञ्चोऽधिकरणं विदुः

**प्रश्नः – ८**

१. ज्ञातुमिच्छा जिज्ञासा

२. ज्ञानक्रियाकर्तृत्वम् ।

३. अद्वैतिनः

४. चत्वारः

५. रामानुजमतस्य

६. अद्वैतवेदान्तस्य

७. परिनिष्पन्नं परं ब्रह्म

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ११**

१. शास्त्रं यस्य योनिः=कारणम्=प्रमाणम्, तत् शास्त्रयोनिः । तस्य भावः शास्त्रयोनित्वम्, तस्मात् ।

२. अद्वैतरीत्या- अनिर्वचनीयत्वम् ।

३. ब्रह्मण अद्वितीयत्वम्

४. सृष्टि-स्थिति-प्रलयम् ।

**प्रश्नः – १२**

१. एकम्

२. न

३. अद्वैतदर्शने

४. ब्रह्मणः

५. शास्त्रम्

६. ५४५

७. मीमांसकाः